19-08-2020

अनिवार्यपत्रम् । शास्त्री B

व्याकरणाद्विषया: । रघुवंशम् । श्लोकव्याख्या ।

" तं प्राप्य सर्वावयवानवद्यं व्यावर्तताऽन्योपगमात्कुमारी ।
न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली ॥"

सन्दर्भ: → पूर्ववत् ।

प्रसङ्ग: → कविरत्राजं प्रति इन्दुमत्या: सान्द्रां स्नेहभावं प्रकाशयति ।

अन्वय: → कुमारी सर्वावयवानवद्यं तं प्राप्य अन्योपगमात् व्यावर्तत, हि षट्पदाली प्रफुल्लं सहकारवृक्षम् एत्य वृक्षान्तरं न काङ्क्षति ।

व्याख्या (शब्दार्थ: व्याकरणञ्च) → कुमारी = इन्दुमती । सर्वावयवानवद्यं → सर्वे च ते अवयवा:, न अवद्य:, तम् = निर्दोषशरीरम् ।
तम् = अजम् । प्राप्य = लब्ध्वा । अन्योपगमात् = अपरराजो-पगमात् । व्यावर्तत = निवृता । हि = यत: । षट्पदाली: → षट् पदानि येषां, तेषाम् आली = भ्रमरावलि: । प्रफुल्लम् = पुष्पितम् । सहकारवृक्षम् = आम्रतरुम् । एत्य = अवाप्य ।
वृक्षान्तरम् = अन्यं वृक्षम् । न = नहि ।
काङ्क्षति = अभिवाञ्छति ।

तात्पर्य: → इन्दुमती सर्वाङ्गसुन्दरम् अजं प्राप्य राजान्तरं तथैव न जगाम, यथा पुष्पिताम्रवृक्षं परित्यज्य मधुकरसमूह: वृक्षान्तरं न याति ।

विशेष: → शृङ्गाररस: । वैदर्भीरीति: । प्रसादगुण: । उपजातिछन्द: । अर्थान्तरन्यासालङ्कार: ।

[signature] 19-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सखवेसा परिसाँ ।

संस्कृत सम्मान्यम् । उपशास्त्री II 19-08-2020

अनिवार्यपत्रम् । तद्धित प्रत्ययः ।

| | त्व (त्वम्) प्रत्ययः | तल् प्रत्ययः |
|---|---|---|
| वीर → | वीर+त्व = वीरत्वम् | वीरता |
| लघु → | लघुत्वम् | लघुता |
| गुरु → | गुरुत्वम् | गुरुता |
| कवि → | कवित्वम् | कविता |
| महत् → | महत्वम् | महत्ता |
| विद्वस् → | विद्वत्वम् | विद्वत्ता |
| सुन्दर → | सुन्दरत्वम् | सुन्दरता |
| नर → | नरत्वम् | नरता |
| पटु → | पटुत्वम् | पटुता |
| पशु → | पशुत्वम् | पशुता |
| मूर्ख → | मूर्खत्वम् | मूर्खता |
| मानव → | मानवत्वम् | मानवता |
| सभ्य → | सभ्यत्वम् | सभ्यता |
| देव → | देवत्वम् | देवता |
| असुर → | असुरत्वम् | असुरता |
| वृद्ध → | वृद्धत्वम् | वृद्धता |
| मृदु → | मृदुत्वम् | मृदुता |
| पितृ → | पितृत्वम् | |
| रूप → | रूपत्वम् | रूपता |
| प्रिय → | प्रियत्वम् | प्रियता |

19-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)।

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम् ।    शास्त्री B    19-08-2020

व्याकरणसाहित्यम् ।    रघुवंशम् ।    श्लोकव्याख्या ।

" तं प्राप्य सर्वावयवानवद्यं व्यावर्तताऽन्योपगमात्कुमारी ।
न हि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली ॥"

सन्दर्भः → पूर्ववत् ।

प्रसङ्गः → कविरजं प्रति इन्दुमत्याः सान्द्रां स्नेहभावं प्रकाशयति ।

अन्वयः → कुमारी सर्वावयवानवद्यं तं प्राप्य अन्योपगमात् व्यावर्तत, हि षट्पदाली प्रफुल्लं सहकारवृक्षम् एत्य वृक्षान्तरं न काङ्क्षति ।

व्याख्या (शब्दार्थः व्याकरणञ्च) → कुमारी = इन्दुमती । सर्वावयवानवद्यं → सर्वे च ते अवयवाः, न अवद्यः, तम् = निर्दोषशरीरम् । तम् = अजम् । प्राप्य = लब्ध्वा । अन्योपगमात् = अपरराजोपगमात् । व्यावर्तत = निवृता । हि = यतः । षट्पदाली → षट् पदानि येषां, तेषाम् आली = भ्रमरावलिः । प्रफुल्लम् = पुष्पितम् । सहकारवृक्षम् = आम्रतरुम् । एत्य = अवाप्य । वृक्षान्तरम् = अन्यं वृक्षम् । न = न हि ।
काङ्क्षति = अभिकाङ्क्षति ।

तात्पर्यः → इन्दुमती सर्वाङ्गसुन्दरम् अजं प्राप्य राजान्तरं तथैव न जगाम, यथा पुष्पिताम्रवृक्षं परित्यज्य मधुकरसमूहः वृक्षान्तरं न याति ।

विशेषः → शृङ्गाररसः । वैदर्भीरीतिः । प्रसादगुणः । उपजातिछन्दः । अर्थान्तरन्यासालङ्कारः ।

19-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।